# Shri Lakshminrisimhashtaksharamantraradhanam

# શ્રીલક્ષ્મીનૃસિંહાષ્ટાક્ષરમન્ત્રારાધનમ્

## Document Information

Text title : Shri Lakshminrisimhashtaksharamantraradhanam

File name : lakShmInRRisiMhAShTAkSharamantrArAdhanam.itx

Category : vishhnu, dashAvatAra, lakShmI, mantra, narasiMhapurANa

Location : doc_vishhnu

Proofread by : M K Barman

Description/comments : nRRisiMhakosha 2 upAsanA khaNDa, narasiMhapurANa | adhyAya

Latest update : August 4, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 4, 2025

*sanskritdocuments.org*

# શ્રીલક્ષ્મીનૃસિંહાષ્ટાક્ષરમન્ત્રારાધનમ્

શ્રીગણેશાય નમઃ । શ્રીલક્ષ્મીનૃસિંહાય નમઃ ।
અથ ધ્યાનમ્ ।
ક્ષીરાબ્ધૌ વસુમુખ્યદેવ નિકરૈરગ્રાદિ સંવેષ્ટિતઃ ।
શઙ્ખચક્રગદામ્બુજં નિજકરૈર્બિભ્રંસ્ત્રિનેત્રાસિતઃ ॥ ૧॥

સર્પાધીશ કૃતાન્તપત્રલસિતઃ પીતામ્બરાલઙ્કૃતો ।
લક્ષ્મીઃ શ્લિષ્ટકલેવરો નૃહરિસ્તાં નીલકણ્ઠો મુદે ॥ ૨॥

અષ્ટાક્ષરેણ દેવેશં નરસિંહમનામયમ્ ।
ગન્ધપુષ્પાદિભિર્નિત્યમર્ચયેદચ્યુતં નરઃ ॥ ૩॥

રાજન્નષ્ટાક્ષરો મન્ત્રઃ સર્વપાપહરઃ પરઃ ।
સમસ્તયજ્ઞફલદઃ સર્વશાન્તિકરઃ શુભઃ ॥ ૪॥

ૐ નમો નારાયણાય ગન્ધપુષ્પાદિ સકલં મનેનૈવ નિવેદયેત્ ।
અનેનાભ્યર્ચિતો દેવઃ પ્રીતો ભવતિ તત્ક્ષણાત્ ।
કિં તસ્ય બહુભિર્મન્ત્રૈઃ કિં તસ્ય બહુભિર્વ્રતૈઃ ।
ૐ નમો નારાયણાયેતિ મન્ત્રઃ સર્વાર્થસાધકઃ ॥ ૫॥

ઇમં મન્ત્રં જપેદ્યસ્તુ શુચિર્ભૂત્વા સમાહિતઃ ।
સર્વપાપવિનિર્મુક્તો વિષ્ણુસાયુજ્યમાપ્નુયાત્ ॥ ૬॥

સર્વ તીર્થફલં હ્યેતત્સર્વતીર્થવરં નૃપ ।
હરેરર્ચનમવ્યગ્રં સર્વયજ્ઞફલં નૃપ ॥ ૭॥

તસ્માત્કુરુ નૃપશ્રેષ્ઠ પ્રતિમાદિષુ ચાર્ચનમ્ ।
દાનાનિ વિપ્રમુખ્યેભ્યઃ પ્રયચ્છ વિધિના નૃપ ॥ ૮॥

એવં કૃતે નૃપશ્રેષ્ઠ નરસિંહપ્રસાદતઃ ।
પ્રાપ્નોતિ વૈષ્ણવં તેજો યત્કાઙ્ક્ષતિ મુમુક્ષવઃ ॥ ૯॥

પુરન્દરો રાજનસિ ત્વં પ્રાપ્તોઽપધર્મતઃ ।
તૃણબિન્દુમુનેઃ શાપાન્મુક્તો હ્યષ્ટાક્ષરાજ્જપાત્ ॥ ૧૦॥

ઇતિ શ્રી નરસિંહપુરાણે અષ્ટાક્ષરમન્ત્રઃ સમ્પૂર્ણમસ્તુ ।

Proofread by M K Barman

*Shri Lakshminrisimhashtaksharamantraradhanam*
pdf was typeset on August 4, 2025

Please send corrections to *sanskrit@cheerful.com*